# शिक्षाशास्त्रद्वितीयवर्षस्य चतुर्थप्रश्नपत्रम्

## (शास्त्र शिक्षणम्)

## 2.अन्विति:

## 2.4 प्रामाण्यवादः

# प्रमाकरणं प्रमाणम्
# यथार्थानुभवः प्रमा

कारणदोषबाधकज्ञानरहितम् अगृहीतग्राहि ज्ञानं प्रमाणम् ।

अर्थात जिस ज्ञान में अज्ञात वस्तु का अनुभव हो, अन्य ज्ञान से वाधित न हो एवं दोष रहित हो, वही 'प्रमाण' है।

- प्रमाणानि चत्वारि
- प्रत्यक्षानुमानोपमान - शब्दाःप्रमाणानि

# प्रत्यक्ष

- साक्षात्कारि प्रमाकरणं प्रत्यक्षम्
- अनुमान
- लिंग परामर्शोंऽनुमानम्

# उपमान प्रमाण

- अतिदेश –वाक्यार्थस्मरण- सहकृतं गो सदृश्यविशिष्टपिंडज्ञानमुपमानम्

# शब्द प्रमाण

- आप्तवाक्यं शब्दम्

# प्रामाण्यवादः

प्रकारेण प्रामाण्यपदेन प्रमात्वं प्रमाकरणत्वं च स्वीक्रियते। अर्थात् यथार्थानुभवरूपं यत् प्रमाणं, तस्मिन् विद्यमानः धर्मः प्रामाण्यम्। अयथार्थानुभवे विद्यमानो धर्मः व अप्रामाण्यमित्युच्यते। अत्र जिज्ञासा समुत्पद्यते यत् कस्यापि वस्तुनः प्रामाण्येऽप्रामाण्ये वा कारणं किम्? अस्या जिज्ञासायाः पूर्त्यर्थं प्रचलितः वादः "प्रामाण्यवाद" इति प्रसिद्धः।

अयं वादः द्विधा भवति। यथा –

(1) कारणं प्रामाण्योत्पादकम् (स्वतः प्रामाण्यम्)

(2) कारणं प्रामाण्यज्ञापकम् (परतः प्रामाण्यम्)

अस्याभिप्रायोऽयं यत् केचन दार्शनिकाः प्रामाण्यस्य कारणं तद् आश्रितज्ञानमेव स्वीकुर्वन्ति, अन्ये च तस्य कारणं स्मृत्यनुमानादिकं साधनं मन्वते। एवमेव स्थितिः अप्रामाण्यविषयेऽपि भवति। अप्रमाणिकता यदि स्वत उत्पद्यते तर्हि स्वतोऽप्रमाण्य, परतश्चेत् परतोऽप्रामाण्यम्। एवं प्रकारेण उत्पत्तिपक्षे ज्ञानप्रमात्वं (ज्ञानप्रामाण्यं) स्वत उत्पद्यते परतो वेति संशयाकारः। तत्र दार्शनिकानां विवादाः यथा –

Scanned with CamScanner

1- न्याय परतः प्रामाण्यवाद

↓

प्रामाण्य-परतः | अप्रामाण्य परतः

2- सांख्य स्वतः प्रामाण्यवाद

↓

प्रामाण्य-स्वतः | अप्रामाण्य स्वतः

3- बौद्ध

↓

प्रामाण्य-परतः | अप्रामाण्य परतः

4- मीमांसा और वेदान्त

↓

प्रामाण्य-स्वतः | अप्रामाण्य परतः

**(1) सांख्यमतम्** :- सांख्यवादिनः स्वतः प्रामाण्यं स्वीकुर्वन्ति। एतेषामनुसारेण प्रामाण्याप्रामाण्यं च स्वत एव गृह्यते। एतेषां मते सर्वमेवकार्यजातं सदेवोत्पद्यते नासद् इति। अतः प्रामाण्यमप्रामाण्यं च द्वयमपि स्वतः सदेवास्ति। तदुक्तं श्लोकवार्त्तिके –

**स्वतोसतामसाध्यत्वात् केचिदाहुर्द्वयं स्वतः**[3] इति।

**(2) नैयायिकानां मतम्** :- नैयायिकाः प्रामाण्यस्य स्वरूपं परतः स्वीकुर्वन्ति। एतेषामनुसारं प्रामाण्यस्योत्पत्तिः तदा भवति यदा ज्ञानोत्पादकानि सर्वाणि साधनानि विद्यन्ते? इन्द्रियाणि च समीचीनानि भवन्ति। एतानि साधनानि बाह्यानि भवन्ति। विषयेन्द्रियसन्निकर्षात् 'अयं घट' इति व्यवसायात्मकं ज्ञानं भवति।[4] तदा 'अहं घटं जानामि' इति अनुव्यवसायः जायते। एतदनन्तरं प्रमाण्याप्रामाण्ययोः स्मृतिः भवति। तदा प्रत्यक्षज्ञानविषये सन्देहोत्पद्यते। अन्ततः प्रवृत्तिः सफला भवति, तदनन्तरं च ज्ञानं प्रामाणिकं भवति। तस्मात् अनुमानद्वारा प्रामाण्यस्योत्पत्तिर्भवति। एवं प्रामाण्यमप्रामाण्यं च परतस्त्वे भवतः।

**( 3 ) बौद्धमतम् :-** बौद्धाः प्रमाणस्य स्वरूपं परतः तथा च स्वतः प्रामाण्यं मन्यन्ते। उक्तम् च 'प्रामाण्यं परतोऽप्रामाण्यं च स्वतः'। तेषां मते विज्ञाने जातेऽपि व्यभिचारदर्शनात् न कश्चिन्निर्विचिकित्सं व्यवहारं कुर्वाणो दृश्यते। ज्ञानकरणानामिन्द्रियादीनां यदा गुणवत्वं दृश्यते तदा प्रामाण्यं निश्चित्य व्यवहारमाणो जनो दृश्यते। अतः स्वत एवाप्रामाण्यज्ञानम्, पराधीनं तु तस्य प्रामाण्यम्।

**( 4 ) मीमांसकानां मतम् :-** मीमांसकानां मतानुसारं प्रामाण्यं स्वत एव भवति अप्रामाण्यं च परतः। एतेषां मते प्रामाण्यज्ञाने ज्ञानग्राहकशब्दानामपेक्षा यत्र भवति तत्र प्रामाण्यस्य स्वतस्त्वं, यत्र च ज्ञानग्राहकसामग्रीभिन्नपदार्थानामपेक्षा तत्र प्रामाण्यस्य परतस्त्वम्। नैयायिकानां मतखण्डनपूर्वकं तैरुक्तं यत्-कस्यापि प्रत्यक्षवस्तुनः प्रमाण्यज्ञानावसरे यदि अनुमानस्यापेक्षा क्रियते, तर्हि तस्यानुमानस्य ग्रहणार्थमपरस्यानुमानस्यापेक्षा क्रियते। एवं प्रत्यक्षज्ञानस्योपरि अनन्तकालं यावत् अनुमानम् एव प्रचलिष्यति। अतः अनवस्थादोष आगच्छति। अतः प्रत्यक्षज्ञानावसरे प्रामाण्यं स्वत एव भवति। यत्र तु सन्देहोत्पद्यते तत्रेतरसाधनस्यापेक्षा क्रियते, अतः तत्र अप्रामाण्यं परतः भवति। एतेषां मतानुसारं ज्ञानग्राहकपदार्थैरेव ज्ञानस्य प्रामाण्यस्य चोभयोर्ग्रहणं भवति।

(5) **जैनानां मतम्** :- प्रामाण्यनिश्चयः क्वचित् स्वतः यथाभ्यासदशापन्ने स्वकरतलादिज्ञाने, स्नानपानावगाहनोदन्योपशमादौ अर्थक्रियानिभासात्मके प्रत्यक्षज्ञाने वा। न हि तत्र परीक्षाकाङ्क्षास्ति प्रेक्षावताम्। अनुमाने तु सर्वस्मिन्नपि सर्वथा निरस्तसमस्तव्यभिचाराशङ्के स्वत एव प्रामाण्यम्, अव्यभिचारिलिङ्गसमुत्थत्वात्। क्वचिच्च परतः प्रामाण्यनिश्चयः, यथाऽनभ्यासदशापन्ने प्रत्यक्षे" तस्य हि प्रामाण्यं तदेकविषयकात्, संवादकाद् ज्ञानान्तराद्वा, अर्थक्रियानिर्भासान्निश्चीयते। शाब्दे

Scanned with CamScanner

ज्ञाने तु दृष्टार्थके संवादाद्यधीनः परतः प्रामाण्यनिश्चयः, अदृष्टार्थके तु संवादं विनापि आप्तोक्तत्वेनैव प्रामाण्यनिश्चय इति शाब्दस्थले सर्वथा परत एव प्रामाण्यनिश्चय इति जैनाः। एवमेतेषामयमभिप्रायो यत् उत्पत्तिदशायां प्रामाण्यमप्रामाण्यं च परतो भवतः ज्ञप्तिदशायां तु द्वौ स्वतौ भवतः।

एवं प्रकारेण सांख्य–नैयायिक–बौद्ध मैमांसक–जैनानां मतानुसारं प्रामाण्याप्रामाण्ययोः स्वतस्त्वपरतस्त्वविचारः प्रस्तुतः।

प्रसिद्धमपि वर्तते यत्–

**प्रमाणत्वाप्रमाणत्वे स्वतः सांख्याः समाश्रिताः।**
**नैयायिकास्ते परतः सौगताश्चरमं स्वतः ।।**
**प्रथमं परतः प्राहुः प्रामाण्यं वेदवादिनः।**
**प्रमाणत्वं स्वतः प्राहुः परतश्चाप्रामाणताम्।।**

इत्थं जैनमतं च प्रमाणमीमांसायां हेमचन्द्राचार्यैः स्फुटीकृतम्। बौद्धेषु सर्वशून्यत्ववादिनो माध्यमिकाः प्रामाण्यं न स्वतो नापि परतो ग्रहीतुं शक्यत इत्यातिष्ठन्ते। अत एव प्रामाण्यवादे तन्मतनिर्वहण पुरस्कारेणैव मीमांसकमतमालोचितं चिन्तामणिकारादिभिः। प्रमाण्यविचारे हि नैयायिका मीमांसका एव प्रायो मल्लप्रतिमल्लभावेन विश्रुताः। नैयायिकाः मीमांसकानां प्रामाण्यस्य स्वतस्त्वं न स्वीकुर्वन्ति। तेषामभिप्रायोऽयं यत् यदा प्रत्यक्षज्ञानावसरे अनवस्थादोषपरिकल्पनमयथार्थं भवति। यत्र सन्देहादनन्तरमपरस्य सन्देहस्योत्पत्तिर्भवति तस्य सन्देहस्यान्ततोगत्वा निराकरणमपि भवति। तस्मात्कारणादेव मानवः कर्मणि प्रवृत्तो निवृत्तो वा भवति। एवमनुमानस्य अनवस्था न स्यात्। तथा प्रामाण्यं परत एव भवति।

अनेन प्रकारेण शास्त्रशिक्षणार्थं प्रमाणानां ज्ञानं महत्त्वपूर्णम्। अस्मिन् जगति केचन विषया एतादृशाः सन्ति येषां ज्ञानं स्वत एव अर्थात् प्रत्यक्षमात्रेण भवति। किन्तु केचन विषया एतादृशा अपि सन्ति येषां ज्ञानार्थं कुत्रचित् अनुमानस्य कुत्रचित् आप्तवाक्यस्य आवश्यकता भवति। एतदर्थं यदि छात्राः प्रमाणविषये सम्यक्प्रकारेण जानन्ति तर्हि तेषामधिगमः इतोऽपि परिपुष्टो भविष्यति।

- धन्यवादः

डॉ. रेखा शर्मा
सहायकाचार्या
(शिक्षाशास्त्रविभागः)
राष्ट्रिय-संस्कृत-संस्थानम्
जयपुरपरिसरः